[८५२] उत्तरपदलोपे चोपसङ्ख्यानम्[1]। (म. भा. ३.३२५)

देवदत्तिका, देवका। यज्ञदत्तिका, यज्ञका।

[८५३] क्षिपकादीनां चोपसङ्ख्यानम्। (म. भा. ३.३२५)

क्षिपका। [2]ध्रुवका।

[८५४] तारका ज्योतिष्युपसङ्ख्यानम्। (म. भा. ३.३२५)

तारका। ज्योतिषि इति किम्? तारिका दासी।

[८५५] वर्णका तान्तव उपसङ्ख्यानम्। (म. भा. ३.३२५)

वर्णका प्रावरणभेदः। तान्तवे इति किम्? वर्णिका भागुरी लौकायते।

[७५६] वर्तका शकुनौ प्राचामुपसङ्ख्यानम्। (म. भा. ३.३२६)

वर्तका शकुनिः। [3]प्राचामन्यत्र उदीचां तु वर्तिका। शकुनौ इति किम्? वर्तिका भागुरी लौकायतस्य।

[८५७] अष्टका पितृदैवत्ये[4]। (म. भा. ३.३२६)

अष्टका। पितृदैवत्ये इति किम्? अष्टिका खारी।

[८५८] वा सुतकापुत्रकावृन्दारकाणामुपसङ्ख्यानम्। (म. भा. ३.३२६)

सुतिका, सुतका। पुत्रिका, पुत्रका। वृन्दारिका, वृन्दारका॥

## उदीचामातः स्थाने यकपूर्वायाः। (४६/४६७)

उदीचामाचार्याणां मतेन यकारपूर्वायाः ककारपूर्वायाश्च आतः स्थाने योऽकारः, तस्यातः स्थाने इकारादेशो भवति। उदीचां ग्रहणं विकल्पार्थम्। इभ्यिका, इभ्यका। क्षत्रियिका, क्षत्रियका। ककारपूर्वायाः – चटकिका, चटकका। मूषिकिका, मूषिकका। आतः इति किम्? साङ्काश्ये भवा साङ्काश्यिका। स्थानग्रहणमनुवादेऽपि स्थानसम्बन्धप्रतिपत्त्यर्थम्। आतः इत्यनेन ह्यतः इति स्थानी विशिष्यते। यकपूर्वायाः इति किम्? अश्वा – [5]अश्विका। यकपूर्वायाः इति स्त्रीलिङ्गनिर्देशः आतः स्त्रीप्रत्ययस्य प्रतिपत्त्यर्थम्। इह [6]न भवति, शुभं याति इति शुभंयाः – शुभंयिका। भद्रं याति इति भद्रंया – भद्रंयिका।

---

1. कर्तव्यम् इत्यधिकम् क. इ. 2. धूसरका क. 3. प्राचाम् नास्ति 4. उपसङ्ख्यानम् इत्यधिकम् क, उपसङ्ख्यातव्यम् इत्यधिकम् ह. 5. अश्वका क. 6. मा भूत् ब. क. इ.